No. १२५२ घ

Title न्यायसिद्धान्तमञ्जरीदीपिका तर्कप्रकाशः

Author श्रीकण्ठदीक्षितः

Extent २३ पत्राणि Age

Subject न्यायवैशेषिकम्

न्यायसिद्धांतमंजरी दीपिकाख्याटीकायाः

प्रथमखण्डः

१२५२

ब्दप्रमाणतया परे उपमानोपजीवकत्वाभावात् फलयोः स्वरूपफलयोश्च संगतिर्बोध्या॥ तस्माच्च फलनिष्ठत्वेपि स्वाश्र
यकरणत्वात्मकपरंपरासंबंधेन करणविशिष्टत्वात्॥ करणयोरानंतर्याभिधाननियामकत्वमवसेयं॥ तथाहि॥
शक्तिपरिच्छित्तिरेवोपमितिः॥ तस्याश्च सर्वस्या एव शाब्दबोधजनकत्वेन फलयो रूपजीव्योपजीवकत्वसंभवः॥ ए
वं स्वरूपफलयोरप्यतिदेशवाक्यार्थज्ञानरूपोपमानप्रमाणस्योपमितिरूपा शाब्दबोधोपजीव्यत्वादिति॥ केचित्तु
ज्ञायमानं परं करणमिति तस्य शक्तित्वेन ज्ञायमानमित्यर्थः तद्विशेषणता हि विधिनिषेधौ विशेषणमुपसंक्रामतः
सति विशेष्ये बाधे इति न्यायेन स्वर्गोध्वस्त इतिवत्। विशेषणभूतशक्तिज्ञानमादायोपमानोपजीवकत्वसंभवे
न स्वरूपत उपजीवकत्वमपि संगतिरित्याहुः॥ परं ज्ञानस्य शाब्दप्रमाणत्वांगीकर्तॄनवीनमते उपमितेर्या रूपर
विषयकत्वेन अतिदेशवाक्यार्थज्ञानात्मकोपमानप्रमाणस्योपमित्यात्मकशाब्दप्रमाणे उपजीवकत्वमक्षुसा
मेवेतिद्रष्टव्यं॥ नन्वतिदेशवाक्यरूपशाब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वात् उपमान

न० श्रा० मेवाद्दैर्निरूपितं न तु शाब्द इत्युक्तं किंचिन्निगमकमिति चेन्न । न प्रमाणतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितोपजी
वकतया एवात्र संगतित्वात् । प्रमाणतावच्छेदकधर्मश्चेंद्रियत्वादिः ॥ अवच्छिन्नत्वं च व्यापकत्वं ॥ एवं चोपमान
स्य संकेतमात्रग्राहकतया सर्वस्यैवोपमानस्य शाब्दप्रमाणोपजीव्यत्वं ॥ शाब्दप्रमाणस्य तु न सर्वस्यातिदेशवा
क्यार्थज्ञानात्मकोपमानोपजीव्यत्वं ॥ घटमानयेति शाब्दे तदभावात् ॥ न च ज्ञायमानपदत्वेन शाब्दत्वावच्छिन्नं
प्रति हेतुतया घटमानयेति शाब्दनिरूपितशाब्दत्वावच्छिन्नकार्यताया उपमाने सत्त्वादुक्तदोषतादवस्थ्यमि
ति वाच्यं ॥ प्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नाया उपजीवकताया विवक्षितत्वात् ॥ प्रमाणविभाजको
पाधिश्च साक्षात्कारकरणत्वादिः ॥ अवच्छिन्नत्वं चात्र स्वरूपसंबंधविशेषः ॥ इष्टं च शाब्दत्वादेरुपमितिकरण
त्वानियतत्वात् ॥ अतिदेशवाक्यार्थज्ञानत्वादेरेव तथात्वेन तस्य प्रमाणतावच्छेदकशाब्दप्रमाणत्वस्य व्यापको राम०
पजीव्यतानिरूपितोपजीवकज्ञानवच्छेदकत्वादुक्तदोषाभावात् ॥ केचित्तु यत्र कीदृग्गवय इति प्रश्नानंतरं चित्रलेखादि

नानादृशपिंडदर्शनंतत्रातिदेशवाक्यंविनापिमानसत्वयातिदेशवाक्यार्थज्ञानात्मकोपमानोदयेनव्यभिचारात् शाब्दो
नोपमानेउपजीव्यइतिउपमानेशाब्दोपजीवकत्वाभावात् नाविनिगमइतिवदंतितदसत् ॥ शाब्दीस्वाकांक्षाशाब्दे
नैवपूर्यतइतिन्यायात्तत्रापिइदृशावय इत्यभिप्रायिकशाब्दकल्पनाया आवश्यकत्वात् ॥ शाब्दीह्याकांक्षाशाब्द
बोधगोचरेच्छाशाब्देनैवविषयसिद्धिद्वारानिवर्त्यतइतितदर्थात् ॥ परिच ॥ पदार्थेषु ज्ञानमात्रेइच्छा ॥ ननुशाब्दबो
धेतत्रशाब्दकल्पनानवकाशः ॥ तत्रशाब्दबोधगोचरेच्छाया अभावेनतादृशन्यायस्यानवतारात् ॥ नचातिदेश
वाक्यार्थशाब्दत्वेनैवोपमितिकरणानयाशाब्दकल्पनमावश्यकं ॥ पदजन्यपदार्थोपस्थितेरेवशाब्दबोधेहेतुत्वात्
शाब्दीशाब्दबोधोपयोगिनीआकांक्षा अन्वयबोधप्रतियोग्युपस्थितिरूपाशाब्देनैवपूर्यतेसंपाद्यतइत्यर्थात् ॥
तादृशन्यायस्याप्यवतारइतिवाच्यं ॥ अतिदेशवाक्यार्थेशाब्दत्वेनोपमितिकरणत्वेमानाभावात् ॥ पौरुषेयत्वच
निश्चितव्यभिचारकंरूपंगत्वमाणव्यभिचारेणाकारणत्वकल्पनानुदयात् ॥ नचनिश्चयत्वमपेक्ष्यशाब्दत्वस्यत्व

त० शा० घुतयातन्निवेपात्ऽवसम्पत्तिरिति वाच्यं। सादृश्यज्ञानोपमानत्ववादिमत इवातिदेशवाक्यार्थस्मृतिरूपव्यापाराभावेनैवान
तिप्रसंगेन निष्क्रयत्वप्रवेशप्रयोजनाभावादिति विभाव्यते तथापि व्यवहारादिनापि शक्तिग्रहात् शाब्दबोधोदयेन व्यभिचा
रात् छब्दप्रमाणा उपमानोपजीवकत्वव्याघातः क्वचित्कोपजीवकत्वस्य च शब्दप्रमाणाद्वोपमानप्रमाणेपि सत्वाद
विनिगमनाविरहश्चेति न किंचिदेतत्।। नव्यास्तु।। स्वतंत्रेच्छस्य नियोगपर्यनुयोगानर्हत्वादिति न्याय एव निगमकं
ननु संगतिरिति तस्यास्तुल्यत्वेपि न क्षतिरित्याहुरिति दिक्।। निरूपित इति लक्षणस्वरूपप्रामाण्यपरिप्रकारकवन्नेमा
न निरूपणविषयः शाब्द इत्यर्थः।। तत्र शाब्दे निरूपणीये शाब्देति।। अत्र शाब्दप्रमितिकरणत्वं लक्षणं प्रमाणशाब्द
पदवाच्यत्वं च लक्ष्यतावच्छेदकं।। प्रमितिकरणत्वमात्रप्रत्यक्षादावतिप्रसक्तेमतः शाब्देति।। ननु शाब्दत्वं शाब्दजन्यत्वं
तथा च शाब्दजन्यप्रमाकरणत्वं लक्षणं पर्यवसितं।। तच्च विषयविधया शाब्दजन्यप्रत्यक्षप्रमितिकरणे श्रोत्रेंद्रि एस०
येऽतिव्याप्तिरित्यत आह शाब्दत्वं चेति।। तथा च शाब्दत्वरूपजात्यवच्छिन्नप्रमितिकरणत्वेन तत्रेति नातिव्याप्तिरि

तिभावः॥ केचित्तु। अतीतानागतघाद्यनुसंधानादपि शाब्दबोधोदयात्॥ शाब्देन करणं किंतु शाब्दज्ञानांशे च शाब्द
जन्यप्रमाकरणत्वस्य लक्षणत्वेऽसंभवः॥ शाब्दज्ञानजन्यप्रमाकरणत्वस्य लक्षणत्वे तु विषयविधया शाब्दज्ञानजन्यप्र
त्यक्षप्रमाकरणे मनस्यतिव्याप्तिरित्यत आह शाब्दत्वं चेतीत्याहुः॥ शाब्दत्वस्य प्रत्यक्षाद्यन्यरूपत्वे गौरवादाह शाब्दत्वं चेती
त्यपि केचित्॥ ननु लक्षणलक्ष्यतावच्छेदकयोरभेद इत्यत आह जन्येति॥ केचित्तु॥ ननु शब्दाद्घटं प्रत्येमीत्येवानुभवो न तु
शाब्दात्प्रत्येमीति आत्मविशेषगुणानां विषयविनिर्मोकेणाभानानुपगमात्॥ तथाच शाब्दजन्यघटादिविधेयकज्ञा
नत्वमेव तद्विषयो न त्वतिरिक्तशाब्दत्वजातिरित्यत आह पदधीजन्येत्याहुः॥ तदसत्॥ शाब्दलिंगकाद्घटाद्यनुमितेरपि
शाब्दजन्यघटविधेयकज्ञानत्वेन तदुत्तरमपि शाब्दयामीति प्रतीत्यापत्तेः॥ शाब्दत्वजातिस्वीकारस्यावश्यकत्वात्॥ न
दस्वीकारमादाय द्वितीयलक्षणप्रणयनेन व्यापकशाब्दत्वस्य संग्रहः संगतिश्चैत्यवधेयं॥ जन्यपदधीजन्यत्व
व्यभिचारिणी अनुभवत्वव्याप्यिका च या जातिः प्रत्यक्षत्वादिरस्ति तद्रूपत्वे सति पदविषयकत्वाव्यभिचारिणी या जा

२

त॰ न्या॰ निरूपमिति त्वं तच्छून्यधीत्वमिति लक्षणार्थः॥ अतिव्याप्तिं वारयति॥ तत्त्वेति॥ प्रत्यक्षानुमितिस्मृतिष्वित्यर्थः॥ तादृशी

3 नां जन्यपदधीजन्यत्वव्यभिचारि अनुभवत्वाव्याप्यकानां॥ सत्वात् इति॥ तथा च तच्छून्यत्वाभावान्नातिव्याप्तिरिति भा

वः॥ स्मृतित्वस्य जातित्वे अनुभवसामग्रीप्रतिबध्यतावच्छेदकत्वेन। ननु प्रत्यक्षादावतिव्याप्तिवारणाय जातिशून्य

त्वे सति स्यात् तां। परिच्छेदशादृत्वेपि ज्ञानत्वादिजातिसत्वात् असंभव इति विभाव्यते॥ तदा अनुभवत्वाव्यापकजातिशून्यत्वे

सतीत्येवास्तु इत्यत आह जातिशून्यत्वमिति॥ जातिशून्यत्वमात्रमपि सत्यर्थः॥ अनुभवत्वेति॥ अनुभवत्वाव्यापक

जातिशून्यत्वमात्रमित्यर्थः॥ अनुभवत्वादीनामिति आदिना ज्ञानत्वगुणत्वसत्वादिपरिग्रहः॥ तथा चेदृशजातीना

नां सत्वात् जातिशून्यत्वं न वक्तव्यमिति भावः॥ अत्र यद्यपि ज्ञानत्वादीनामपि सेववक्तुमुचितं तथापि तद्व्यापके सत्यत्र तच्छे

देनानुभवत्वपरामर्शोपानुभवत्वादीनामित्युक्तं॥ तद्व्यापकेति॥ अनुभवत्वाव्यापकेत्यर्थः॥ अनुभवत्वाव्याप राम॰

केत्यस्य व्यावर्तिमाह जन्येति॥ तथा संभवि॥ तादृशेति॥ जन्यपदधीजन्यत्वव्यभिचारीत्यर्थः॥ नन्वनुभवत्व

वारणायानुभवत्वान्यत्वमेवोपादीयतामिति तत्राह आदीनामिति ॥ आदिना ज्ञानत्वपरिग्रहः ॥ अनुभवत्वाव्यापकत्व
मनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं ॥ तेनानुभवत्वादिव्युदासः ॥ नन्वनुभवत्वव्याप्यत्वमेव किं नोपादीयते कृतमव्या
पकत्वघटितत्वेनेति चेन्न ॥ व्यापकसामानाधिकरण्यादिरूपव्याप्यत्वनिवेशे गौरवात् एवमनुभवत्वस्यापि स्वव्याप्यत्वा
त्तद्वारणाय भेदघटितव्याप्यत्वस्यावश्यं वाच्यतया ॥ किं च गौरवाद्यमन्यमते तु अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यानुभ
वत्वे सत्त्वेनानुपपत्त्यभावात् ॥ स्मृतावतिव्याप्तिवारणाय चरमधीपदस्यानुभवपरत्वं विनाऽनिर्वाहाच्चेति ॥ पदजन्यत्वव्यभि
चारि अनुभवत्वाव्यापकजातिशून्यत्वमिति कृते ऽसंभवः ॥ उपमानपदस्य करणत्वासंभवेन शाब्दत्वस्यापि पदजन्यत्व
व्यभिचारित्वादतः पदधीति ॥ इत्थं च जन्यपदव्यावृत्तिमाह पदधीति ॥ नन्वनुमितित्वस्यापि तादृशस्य सत्त्वात् कथमतिव्याप्ति
रत आह ॥ नुमेतित्वस्येति ॥ भगवद्वृत्तिः ॥ अनुमितित्वस्य [illegible] पदधीजन्यत्वव्याप्यत्वेनासत्त्वादिजातिरेव तथा ॥ तच्छू
न्यत्वं चानुमितावपि सत्त्वेनातिव्याप्तिः ॥ जन्यपदोपादाने चानुमितित्वस्यापि तथात्वेन तच्छून्यत्वाभावान्न क्षतिरिति भावः ॥

न० शा०

अतः अतिव्याप्त्यादितः॥ समुदितमिति॥ जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वं तन्मिलितयोः॥ अत्र च
जन्यत्वव्यभिचारीति जन्यधीत्वव्यभिचारीति धीत्वव्यभिचारीति धीजन्यत्वव्यभिचारीति जन्यजन्यत्वव्यभिचारीति वा नो
क्तं॥ अनुमितित्वस्य जन्यज्ञानत्वजन्यव्याप्तिज्ञानजन्यत्वसाध्यत्वान्तर्व्यभिचारिजातिशून्यत्वस्यानुमितावपि सत्त्वादिति
व्याप्तेः। जन्यपदधीत्वव्यभिचारीजातिशून्यत्वमात्रोक्तौ शाब्दत्वस्यापि तथात्वेनासंभवापत्तिरिति विशिष्टमुपादेयमेव॥
ननु जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वमेव लक्षणमस्तु किं तद्विशेष्यदलेनेत्यत आह उपमि
ताविति॥ उपमितेः पदविषयकत्वादेशवाक्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचारिप्रत्यक्षत्वादिजाति
शून्यत्वादिति भावः॥ शून्यान्तेपदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः॥ पदविषयकशाब्दबोधे परस्यापि भानान्
पदविषयकत्वसमानाधिकरणशाब्दत्वशून्यत्वाभावादसंभव इति समानाधिकरणान्तं विहायाव्यभिचारीति॥ ननु सर्व शम०
त्र शाब्दबोधे परस्य भानेन बोधकाभावाच्छाब्दत्वस्यापि पदविषयकत्वाव्यभिचारित्वमेवेति। चेन्नावस्यापरजन्यपदा

र्थोपस्थितिनास्य ये ज्ञानादेरेव शाब्दबोधहेतुतया शाब्दस्य सर्वत्र भाने मानाभावात्॥ यत्र भिन्नविषयकानुमितिसाम
ग्रीकाले घटमानयेति शाब्देच्छा तत्र शाब्दबोधः॥ तत्र शाब्दविषयकशाब्दं जायतामितीच्छाविरहविशिष्टानुमितिसामग्र्याः
प्रतिबंधकत्वेन शाब्दशाब्दानुपपत्तेर्घटपदेच्छापात्र्यपि नत्तोत्तेजकत्वे तत्तदिच्छाभावकूटनिवेशेनातिगौरवाच्च मि
थो विशेषणविशेष्यभावे विनिगमनाविरहेण तत्कार्यकारणभावापत्तेश्चेति शाब्दविषयकशाब्दस्येरीत्या शाब्द
त्वस्य परविषयकत्वाव्यभिचारित्वाभावेनासंभवाभावादिति न किंचिदेतत्॥ जानाविति॥ जात्या द्रावित्यर्थः॥ तत्र जा
त्यभावादिति भावः॥ मणिकृतस्तु॥ प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शाब्दः प्रमाणमिति शाब्दलक्षणं॥ प्रयोगे वा
क्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्जन्यशब्दत्वं प्रमाणशब्दत्वमित्यर्थः॥ वाक्यार्थे भ्रममादाय वह्निनासिंचतीत्यादौ प्र
योग्येति व्याप्तिवारणाय तत्त्वपदं तथापि पदार्थतत्त्वज्ञानमादाय योग्येतिव्याप्तेः प्रयोगहेतुभूतेति॥ इत्थं चार्थपद
स्य वाक्यार्थपरत्वपर्यवसानात् न पदानपादाय यातिव्याप्तिः॥ नथा हि॥ हेतुपदस्य माभिव्याहृतभूतपदस्य भू प्राप्ताविति
धात्वनुसारादितरनैरपेक्ष्यस्य सुसन्ततयास जातीयनैरपेक्ष्यस्य चात्र विवक्षिततया पसयोगप्रतिपाद्यज्ञानं प्रयोगे

त० प्रा०

5

कृत्स्नेष्वप्रयोगप्रतिपाद्यज्ञानान्तरं नापेक्षन्ते तादृशार्थतत्त्वज्ञानजन्यत्वं लब्धं॥ नहि वाक्यार्थज्ञानं पदार्थज्ञानमप्यर्थ
ज्ञानानपेक्षं प्रयोगहेतुः वाक्यार्थतत्त्वज्ञानस्यैवापेक्षणीयत्वादिति॥ अत्र च प्रयोगो वाक्यं तथा च तत्कालीनत
त्पुरुषीयस्वजन्यज्ञानविषयविषयकं ज्ञानं प्रकृतवाक्ये जननीये स्वस्मिन् जननीये प्रयोगप्रतिपाद्यज्ञानान्त
रं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयकज्ञानान्तरं नापेक्षन्ते तादृशार्थतत्त्वज्ञानजन्यत्वमर्थः॥ वाक्या
र्थज्ञानेन वाक्यजननीये स्वपूर्वं तत्र पदार्थज्ञानस्यापेक्षणादन्यथा तस्याहेतुत्वापत्तेरिति स्वोत्तरोत्पन्नत्वमपि स्वजन्य
ज्ञानविषयविषयकज्ञानान्तरेविशेषणीयं॥ तथा च तत्कालीनतत्पुरुषीयस्वजन्यप्रमात्वं तत्कालीनतत्पुरुषीयप्रमाणशब्द
त्वमिति फलितं॥ अत्र स्वोत्तरोत्पन्ने सत्र स्वयदर्थतत्त्वज्ञानपरं स्वपदं ज्ञानरूपप्रकृतवाक्यपरं॥ पदार्थतत्त्वज्ञाने न च
वाक्ये जननीये स्वोत्तरोत्पन्नप्रकृतवाक्यजन्यज्ञानविषयविषयकस्य वाक्यार्थज्ञानस्यापेक्षणान्न पदार्थतत्त्वज्ञानज
न्यत्वमाद्यायां योग्यतायामिति॥ संस्काराद्यावृत्तिव्याप्तेर्लक्षणे शब्दपदप्रमाणमात्रस्य लक्ष्यत्वे प्रत्यक्षाद्यव्या एम०
प्तेर्लक्ष्येप्यप्राह्रृपदमनुषंजनीयमिति॥ ननु तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकं पत्रमात्मकं ज्ञानं

स्वस्मिन्जननीयेतत्कालीननरपुरुषीयस्वजन्यज्ञानविषयविषयकंप्रमांतरंनापेक्षतेतादृशप्रमाजन्यशाब्दत्वंतत्कालीननरपुरु
षीयप्रमाणशाब्दत्वमितिफलितं॥ प्रमात्वंचकुद्रमभिन्नत्वंनातत्र्योभ्रिकप्रमामादायापत्तिप्रसंगः॥ इदंत्वचवह्निनासिंचतीत्यादौ
१३ पदार्थतत्वतात्स्वस्वसमानजातीयवाक्यार्थज्ञानांतरापेक्षतयातद्वापातिव्याप्त्यभावेपिकेणाभिधानेवाक्यरूपेष्टसाधनता
प्रमामादायापत्तिप्रसंगः॥ वह्निकरणकसेकानुकूलकृतिमानितिप्रकृतवाक्यजन्यज्ञानविषयकरणत्वघटकीभूताभादि
विषयकत्वेनेष्टसाधनताज्ञानजन्यत्वस्यापिप्रकृतवाक्यजन्यज्ञानरूपविषयविषयकार्थतत्वज्ञानत्वात्॥ तेनचवाक्ये
जनयितव्येसजातीयज्ञानांतरानपेक्षणादिति एवंशाब्दोद्रव्यमितिवाक्यस्यापितादृशवाक्यजन्यज्ञानविषयतयातद्
शवाक्यजन्यज्ञानविषयवाक्यविषयकवाक्यरूपेष्टसाधनतीप्रमादायपशाब्दोद्रव्यमपिसयोग्यवाक्येतिव्याप्तिः॥ अपिच
यःकरणकरोकानुकूलकृतिमान्यणञ्जद्रव्यमपिसा॥ भ्रिकभ्रमात्मकसमूहालंबनजन्येपययसासिंचतीत्यादिवाक्येऽव्या
प्तिः॥ तादृशवाक्यार्थज्ञानस्यभ्रमभिन्नत्वाभावात्॥ ईश्वरीयवाक्यार्थज्ञानस्यचस्वसमानजातीयास्मदीयवाक्यार्थज्ञा
नसापेक्षतयातद्वापलक्षणःगमनात्॥ अन्यथातद्दीपपदार्थतत्वज्ञानमादायायोग्येतिप्रसक्तेईश्वरस्यादिति

६

न० शा० कथमेतदिति चेन्नैव॥ पारश्राथ्येन तत्त्वज्ञानं स्वसमानजातीयज्ञानांतरानपेक्षं ससप्रयोगहेतुः तज्जन्यत्वमिति न लक्षणा
6 र्थः॥ किंतु प्रयोगे हेतुभूते पदार्थतत्त्वज्ञानं प्रकृतवाक्यार्थविषयकतत्त्वज्ञानं तज्जन्यत्वं लक्षणांतत्कालीनतत्पुरुषीयस्वजन्यज्ञा
नं पदार्थसंसर्गैकपद्यप्रकारकत्वावच्छिन्नपद्यद्विशेष्यकं तेन तत्संसर्गकतत्प्रकारकतावत्तद्विशेष्यकत्वाभ्रमभिन्नज्ञान
जन्यशाब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशाब्दत्वमिति पर्यवसितोर्थः॥ वह्निना सिंचतीत्यादौ वह्निकरणकसेकानु
कूलकृतिमानिति बोधो ऽयेन तादृशयक्तं ज्ञानस्य भ्रमत्वान्न तत्रातिव्याप्तिः॥ एवं शाब्दो द्रव्यमित्यादावव्याप्तिः॥ भ्रमात्मकस
मूहालंबनजन्ये पयसा सिंचतीत्यादौ त्वीश्वरीयप्रमामादाय संगतिः॥ एवमन्यपरवाक्ये मौनिश्लोकादावपीति॥
नचात्र वह्निना सिंचतीयपयसा सिंचतीत्यादिवाक्यार्थं वह्निकरणकसेकानुकूलकृतिमान्पयःकरणकसेकानुकू
लकृतिमानिति समूहालंबनशाब्दबोधः तत्र पयसा सिंचतीति वाक्ये ऽव्याप्तिः॥ तदीयजन्यं ज्ञानं यद्विशेष्यता
कतत्त्वद्विशेष्यकभ्रमभिन्नज्ञानाप्रसिद्धेरिति वाच्यं॥ यद्यद्विशेष्यतांशे स्वजन्यतावत्तद्विशेष्यकभ्रमभिन्नज्ञान १५०
त्वस्य विवक्षितत्वादित्याहुः॥ इदं च बबाधपिपासापूर्वैककवाकालावच्छिन्नप्रतिवाक्यार्थज्ञानं हेतुरिति संप्रदायमतेन॥

वस्तुः॥ बुबोधविषयान्यथासिद्धत्वात्तस्य कारणत्वासंभवेन तदुपेक्ष्य शाब्दप्रमितिकरणं शाब्द इति फलघटितमेव लक्ष
णमत्र कृतमिति ध्येयम्॥ प्रत्यक्षातिरिक्तप्रमाणत्वे मानाभाव इति शाब्दस्याप्रमाणतयाप्यर्थः तन्निर्वचनेनेति चार्वाकमतं
कटाक्षयन् शाब्दस्य प्रमाणत्वं साधयति सोयं शाब्द इति॥ शाब्दप्रमितिकरणं शाब्द इत्यर्थः॥ सकलेति॥ शाब्दस्मृतेरपीत्य
नुभवविषयत्वस्यर्थः॥ दुरपह्नव इति॥ नाहं शाब्दप्रत्यक्षस्यान्यविषयकत्वे बाधाच्छब्दविषयकत्व एव पर्यवसानेन शब्दसि
द्धिः प्रतीतस्यदसाधकत्वपदार्थेमानाच्छेद इति भावः॥ ननु न वयं शाब्द एव नास्तीति ब्रूमोपि तु तस्यातिरिक्तशाब्दप्रमि
तिकरणत्वमेव नास्तीत्यत आह तज्जनकत्वमपीति॥ तस्य शाब्दस्य जनकत्वमपि शाब्दप्रमितिजनकत्वमपीत्यर्थः॥ व
स्तुतस्तु॥ सोयं शाब्द इति पाठः॥ शब्दस्यापीति प्रतीतिसिद्धः शाब्दबोध इत्यर्थः॥ तज्जनकत्वमपि शाब्देनीदृशशब्द
प्रमितिकरणत्वमपीत्यर्थः॥ तथा दुरपह्नवं॥ तत्र हेतुमाह आगमेति॥ प्रतीतेरिति वाक्यादमुमर्थं प्रत्येमीत्यनुभवस्य प्र
त्यक्षविषयकत्वासंभवेन प्रत्यक्षातिरिक्तप्रमितिस्वीकारः तत्करणस्वीकारस्यावश्यक इत्याशयः॥ नन्वस्तु शाब्दस्य
प्रमाणत्वं आस्तां च तज्जन्यज्ञानस्य प्रत्यक्षातिरिक्तत्वं तथाप्यनुमित्यात्मकत्वमेव तज्जन्यज्ञानस्यास्त्वतो व्यर्थैषा

न॰ श॰ 7

कतन्निरूपणेनेत्यत आह केवलमिति॥ अनुमानविषयाऽनुमानत्वेनान्यथा चेति॥ शाब्दविषयावेत्यर्थः॥ ननु तस्य प्रत्यक्षाति
रिक्तप्रमितिजनकमेव नास्तीति विवाद इति भावः॥ विप्रतिपद्यत इति॥ विप्रतिपत्तिस्वरूपं॥ अनुमितित्वासमानाधिकरण
प्रमितिविभाजकोपाध्यवच्छिन्नजन्यतानिरूपितप्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नजनकताश्रयो न वेत्याका
रिका॥ अत्र विधिकोटिर्नैयायिकानां निषेधकोटिर्वैशेषिकाणां॥ विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणेन्द्रियस्यैव प्रत्य
क्षप्रमाणतया प्रत्यक्षं प्रति इन्द्रियत्वेन हेतुत्वेन तादृशजनकताश्रयत्वात्॥ निषेधप्रसिद्धिश्च घटादावेव सुलभा॥ अत्र
सिद्धसाधनवारणाय अनुमितित्वासमानाधिकरणप्रमितिविभाजकोपाधिनियतधर्मावच्छिन्नत्वनिवेशः॥ अनु
मितिभिन्नशाब्दविषयकप्रमितिकरणं न चेति प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यका
रणता॥ पृथगिति॥ अनुमितिभिन्नशाब्दविषयकप्रमितिकरणमित्यर्थः॥ अतो न सिध्यसिद्धिव्याघातः॥ नन्वनुमा
नेन ननु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यके॥ अतो न शब्दलिंगकानुमानमादाय बाधः॥ न एम॰
न्विदं घटानयनादिरूपार्थे वक्तृत्वादिहेतेनुमानं स्यादत आह कुशब्दस्येति॥ अर्थाव्याप्यत्वात् स्वजन्यप्रतिविषयार्थ

निरूपिततया प्रमात्वत्वादिसमर्थः॥ अव्याप्यत्वं दृष्टांयनितहीतितत्तद्वृत्तित्वात् आकाशावृत्तित्वात्॥ तथा वा व्यभिचरि
तसामानाधिकरण्यरूपव्याप्तिः प्रोक्ते न संभवति॥ साध्यहेत्वोर्वैयधिकरण्येन च रजतज्ञानवानयमिति ज्ञानाद्भ्रान्तिज्ञप्रव
सापत्तिवारणाय पुरोवर्त्तिविशेष्यकरजततावच्छेदकप्रकारकज्ञानस्यैव प्रवर्तकतया न तत्सिद्धिरिति वाच्यं॥ लाघवात्प्रव
त्तिविषयेष्टतावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव प्रवर्तकतया साध्यसिद्धौ ज्ञानपदस्य प्रमापरत्वेन प्रमात्वघटकतयाप्र
कृतेतरस्याप्यनुसरणत्वात्॥ न चानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन प्रमारितपदार्थत्वेनैव रजतादिसिद्धे
रननुरजनत्वादिना॥ प्रमेयत्वादिना तादृशज्ञानस्य प्रवर्तकत्ववारणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्तक
त्वादिति वाच्यं॥ पूर्वं रजतत्वादिना रजतादेरुपस्थितत्वादितरबाधबलानेन रूपेणानुमितेर्भानसंभवात्॥ अत एव
वसकर्त्तकानुमाने लाघवोपनीतमेकत्वादिकमपि भासते लाघवानज्ञाने न र बाधातिरिक्तस्थल एव च व्यापकतान
वच्छेदकरूपेणाभानानुपगमादिति॥ पदार्थं एते पदार्थास्तास्तु सर्वविषयविषयमिस्यर्थः संसर्गे वृत्तः आकांक्षादिम
सत्स्मारितत्वादित्यनुमानेन विशिष्य रजतत्वादेः पक्षतावच्छेदकतया न सिद्धिः॥ न च नदीजलसंसर्गपरतया

त०व्या० त्वमितेस्तु हेतोर्विमलं जलं नद्याः कच्छे महिषः स्वादितीतिवाक्ये अप्रसाधकेन दृष्टीकष्ट्यपदार्थयोर्व्यभिचारः तात्पर्यगर्भसाध्यत्वादिति
वाच्यं॥ तात्पर्यगर्भपरस्परनिरूपितताकांक्षादिमत्त्वाभावेन तत्र व्यभिचारात्॥ ननु तथापि हेतुतावच्छेदकावच्छिन्न हेतुतानिश्चय
४ स्यैवानुमितिहेतुतया यत्र योग्यतासंशयः तत्र योग्यतागर्भहेतुमत्तानिश्चयाभावादन्वयावोधप्रसंगान्न च योग्यतासंशयस्य
बाधसंशयपर्यवसन्नतया साध्यसंदेहस्यानुमित्यनुगुणतया पक्षताघटकसंशयातिरिक्तसंशयान्यत्वमेव हेतुमत्तानिश्चय
त्वमितिवाच्यं। गौरवात्॥ साध्यव्याप्यसाध्यवान्वेतिसंशयादनुमित्यापत्तेश्चेति चेन्न॥ अपमालोको धूमोवो भयथापि वह्नि
व्याप्य इत्यत्र हेतुतावच्छेदकसंदेहेपि तैव्यापकैरनुमितेरभ्युपगमात्॥ साध्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वेन स्वच योग्यता
रूपहेतुविशेषणसंदेहेपि संभवान्नकाप्यनुपपत्तिरत आह दृश्यते चेति ननु व्याप्तिभ्रमादेवानुमितिरस्तु न च भ्रमात्मकपरा
मर्शजन्यत्वादनुमितेर्भ्रमत्वापत्तिरितिवाच्यं॥ विषयवाधभ्रमत्वनियामकत्वेन दोषाभावादित्यत आह दृश्यते चेत्यपि कच्छि
त्॥ व्याप्नीति॥ पदैनिष्ठव्याप्तिज्ञानशून्यानामित्यर्थः॥ नचेति नहीत्यर्थः॥ अयं व्याप्तिज्ञानशून्यकालीनः शब्दप्रयोज्योनुभवः
तस्यानुमितेः॥ नन्विदं व्याप्तिज्ञानाजन्यात्विलक्षणोवानुमितिः॥ न चेत्तत्रानुमितित्वसत्त्वे मानाभावः। समाने विषये शाब्द एम०
सामग्र्या बलवत्त्वादनुमितिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं। मन्मते तत्र शाब्दव्याप्तिकानुमितित्वस्वीकारात् तत्र

9 तत्प्रतिबंधकत्वात् एवं भिन्नेविषये अनुमितिसामग्र्याः शाब्दसामग्र्याश्च प्रतिबंधकताद्वयकल्पने गौरवं॥ मन्मते अनुमि-
तिसामग्री प्रतिबंधकतयैवोपपत्तेरत आह प्रतिपत्तिचेति॥ अननुमितमिति॥ नच व्याप्तिज्ञानादिपरितसामग्रीजन्यानु-
मितित्वाभाव एवतद्विषयइति वाच्यं व्याप्त्याद्यप्रतिसंधानेपि तस्यानुभवसिद्धत्वात्॥ असाक्षात्कृतमिति॥ यद्यपि नोपमितमित्यपि
वक्तुमुचितं तथाप्युपमितेः शक्तिमात्रविषयकतया घटादिविषयकज्ञानस्य ततोऽसंभवेन तादृशकरणस्य निः प्रयोजनत्वात्॥ नोप-
मितमिति शेषइत्यपि कश्चित्॥ तथाच शाब्दजन्यज्ञाने अनुमितित्वाद्यभावेन विलक्षणप्रमितिसंततस्वीकारस्यावश्यकतया तत्क-
रणस्य प्रमाणांतरत्वमावश्यकमिति भावः॥ श्रुतमिति॥ नैय्यायिकशाब्दजन्यशाब्दबोधविषय इत्यर्थः॥ श्रु धातोर्नानार्थत्वेन शाब्द-
जविशिष्टशालित्वात् अत एवात्मा वारे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिरप्युपपद्यते॥ इदयटकमानयनादि॥ नैय्यायिकेभ्य इति॥ वै-
शेषिकस्य शाब्दस्यानुमितित्वे लिंगविषयेवत्तद्बोधकत्वात्तत्पायिकेभ्य इत्युक्तं नैय्यायिकानां शाब्दस्यैवोच्चारणात्॥ एतावता
सर्वज्ञानसंभवात् शाब्दबोध एव श्रानुरिति भावः॥ तस्मिन्मीमांसकाः स्युः॥ लौकिकवाक्यस्थले शाब्दबोधस्वरूपप्रकृतवाक्यार्थगो-
चरयथार्थज्ञानवदुक्तस्वरूपासोक्तत्वानुमितिसामग्रीसत्वेनासोक्तत्वानुमितिसंभवात्॥ वाक्यार्थज्ञानस्यावश्यकत्वात्तदुक्त-
इव वेदस्थले तत्र शाब्दसामग्रीतः शाब्दोत्पत्तेः लौकिकः शाब्दोनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्व-
रूपत्वात् स्वसमानाधिकरणस्वामवृहितपूर्ववृत्तिस्वसमानाकारनिश्चयविषयकतद्विशेष्यकतत्प्रकारकानुभवमात्रजनक-

५

त॰ च्या॰ तद्रूपत्वादिति यावत्॥ स्वपरमनुभवपरं वेदस्य त्वपौरुषेयत्वेनाप्तोक्तत्वानुमानासंभवात् अनेन वाद्कत्वासामान्यं एवं ज्ञानाधिगतार्था
नुभवकरणत्वस्यैव प्रामाण्यपदरूपत्वात् न च गृहीतग्राहीतराऽनुभवकरणत्वं स्वसमानाधिकरणस्वाव्यवहितपूर्ववृत्ति स्वसमानाका
रनिश्चयविषयविषयकेन तत्र शाब्दे तद्विशेष्यकतत्प्रकारकानुभवकरणत्वमिति यावत्॥ स्वसमानाकारत्वं च स्वस्मिन्प्रकारद्वी वि
शेष्यकत्वावच्छिन्नतत्प्रकारितानिरूपिततद्विशेष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वमपि सुचुः॥ तदसत्॥ व्याप्तिस्मृतिविलंबेना
प्तोक्तत्वानुमितिसामग्र्यभावेन प्रथममेव शाब्दबोधादननुवादकत्वेन प्रमाणत्वात्॥ ननु लौकिकवाक्ये ह्याप्तोक्तन
चेत्तत्संशये शाब्दबोधानुदयात्तत्प्रापकव्यतिरेकनिश्चयोपपन्नप्रतिबन्धकोऽनन्निश्चयस्तत्र हेतुः अनुमितेर्व्याप्तिज्ञानोत्तरोत्पत्तिनियमे
नाप्तोक्तत्वनिश्चयस्य हेतुत्वात्॥ शाब्दबोधात्पूर्वं तत्प्रापकस्थापकत्वेनेति चेन्न॥ तत्कार्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्य
जन्यशाब्दत्वं वा लौकिकत्वेन ज्ञातवाक्यजन्यशाब्दत्वं वा॥ नाद्यः॥ वेदे तदभावात्॥ न द्वितीयः॥ आप्तोक्तत्वानिश्चयेऽपि वेदा
नुकारेणापठ्यमानमन्त्रादिवाक्याच्चैत्रपौरुषेयत्वाभिमानिनो मीमांसकस्य शाब्दबोधोदयेन व्यभिचारात्॥ नापि तृतीयः॥ लौ
किकत्वेनाज्ञातलौकिकवाक्यस्थलेऽप्युक्तशाब्दसामान्यसामग्रीत एव लौकिकत्वेन ज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवेन व्याका
रणत्वात्॥ न च यत्संशये सत्यादिनियमेन तद्धेतुत्वमिति वाच्यम्॥ तत्संशयेऽपि वाक्यार्थबोधोत्पादेन संशयस्याप्रतिबन्धकत्वात्॥ एप०
अव्यभिचारिसंशयव्यतिरेकनिश्चयप्रागभावं धेयव्याप्तिज्ञानेऽव्यभिचारेण प्रयोजकत्वेन चमत्कारनियमाभावाच्च॥ एतेन शाब्दसा

दसमभ्यासेऽनासोक्तत्वशंकाविरहो हेतुः सत्वलौकिके आसोक्तत्वानुमानादेव त्वपौरुषेयत्वानुमानात् ॥ नचापौरुषेयत्वनिश्चयद
शायामेव वेदस्यानुभावकत्वे दोषवत्पुरुषाप्रणीतपदस्मारितत्वरूपहेतुज्ञानसत्वेन पदार्थसंसर्गसिद्धिसंभवात् ॥ वेदस्याप्यनुवाद
कतापत्तिरिति वाच्यम् ॥ व्याप्तिस्मृतिविलंबेन तद्विलंबादिति परास्तेः ॥ अनासोक्तत्वसंशयस्याप्रतिबंधकत्वात् । योग्यतासंशयव
दिति दिक् ॥ प्राभाकरास्तु ॥ क्वचिच्छाब्दभ्रमः ॥ क्वचिच्च प्रमेति नियमनिर्वाहाय शाब्दप्रमासाधारणं च प्रतिकिंचित्कारणमुपेयं ॥ त
च्चैन योग्यता अन्वयप्रयोजकरूपवत्वरूपयोग्यतायाः कारकत्वाभिप्रायप्रयुक्तपदसांनिध्यवतीत्ययोग्यवाक्येपि सत्वात् ॥ अथ दोषा
भावएव तथास्तु दोषाश्च भ्रमप्रमाहेतुविप्रतिपत्त्याकरणपाटवरूपाः वक्तृनिष्ठाः भ्रमप्रमाज्ञानीयवाक्यार्थगोचरे भ्रमः प्रमा दोषा
नवधानता ॥ सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवाक्यार्थनिश्चयव्यतिरेकः श्रुकीयवाक्यार्थनिश्चयव्यतिरेको वा रागपक्षस्यत
निवेशः ॥ अन्यथाप्रतीतस्यार्थस्यान्यथाप्रतिपादयिषाप्रतारणेच्छैव च विप्रलिप्सा ॥ इच्छाविषयीभूतवर्णानुकूलकंठताल्वाद्यभिघा
तानुसारकालीनापरवर्णानुकूलकंठताल्वाद्यभिघातः करणपाटवं करणं कंठाभिघातः तस्यापाटवमसामर्थ्यं ॥ इच्छाविषयी
भूतवर्णाननुकूलत्वमिति पावदितिचेन्न ॥ भ्रांतप्रतारकवाक्ये संवादेन प्रमाणे प्रतारणारूपदोषसत्वेन व्यभिचारात् ॥ अन्यथाप्र
तीतस्याविषमानार्थे प्रतिपिपादयिषायाएवात्र प्रतारणात्वेनोक्तदोषाद्वारेपि सर्वसाधारणदोषत्वस्यैकाभावेन नतत्तदभा
वस्य प्रत्येकं कारणत्वं भ्रमसत्वेप्यन्यदोषाभावसत्वात्प्रमापत्तेः ॥ अभावकूटस्य च कारणत्वे गौरवात् विसंवादिस्मृकवाक्या

त० ग्रा० 10

द्यपि प्रमापत्तेश्च ॥ न स्याद्यथार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शाब्दप्रमाप्रयोजकं ॥ यथार्थतात्पर्यकत्वं च यथार्थवाक्यार्थ
प्रतीतीच्छयोच्चरितत्वं एकपदार्थे ऽपरपदार्थप्रतीतीच्छयोच्चरितत्वमिति यावत् ॥ उच्चरितत्वं चानुसंधीयमानत्वं तेन न तन्मते वर्णाना
नित्यैकरूपत्वेपि नासंभवः ॥ नवाप्तोऽनित्योक्तेः व्याप्तिः वेदे तु पूर्वपूर्वाध्यापकेच्छामादाय संगतिः पूर्वपठ्यपानवेदस्य पं दि
न पठ्यमानवेदादभिन्न एव वेदस्यानित्यत्वात् ॥ नित्यानुमेय चेदेतु तदर्थज्ञापकत्वेन मम्येव सामग्रीति न व्यभिचारः ॥ शुकवाक्ये
प्यशिक्षकत्वासमादायोपपत्तिः ॥ वर्णाजातन्मते नित्यैकरूपत्वत् ॥ न च दैववशात्संपन्नशुकबालादिवाक्यसंभाव इति वाच्यं ॥
तस्याप्रमाणत्वात् ॥ व्यवहारस्तु प्रमत्तवाक्यसंसर्गाग्रहात् ॥ केचित्तु ॥ शुकबालादिभिन्नलौकिकवाक्ये यथार्थवाक्यार्थप्र
तीतीच्छयोच्चरितत्वं वेदे वेदत्वादि शुकबालादिवाक्ये ऽबाधितार्थकत्वं नानैव शाब्दप्रमाप्रयोजकं एकशक्तिमत्त्वे न च तेषामकार
णत्वमपि तिनाननुगमः ॥ न च सर्वत्राबाधितार्थकत्वमेव प्रयोजकमस्त्विति वाच्यं यत्राप्यघटाभिप्रायेण गृहे घटोस्तीत्युक्ते घटां
तरं दृष्टवान्तमानयति तत्राप्यपरत्वेना प्रमाणोपि प्रामाण्यापत्तेः ॥ तदुक्तं ॥ प्रसरः शब्दः स शब्दार्थो यतः इत्याहुरिति दिक् ॥ तच्च एम०
ज्ञातमुपयुज्यते ज्ञायमानघटकतानोपयोगि व्यभिचारित्वलक्षणत्वात् व्याप्तिवच्छब्दशक्तिवच्चेति न ज्ञानं हेतु । ज्ञातमुपयुज्यते शा
ब्दबोध ॥ ॥

निरूपितज्ञाननिष्ठकारणतायां विषयतासंबंधेनावच्छेदकं । शाब्दबोधनिरूपितज्ञानावच्छिन्नकारण
ताश्रयस्य शाब्दबोधे जननीये उपयोगित्वे सति सहकारित्वे सति । व्यभिचारिवैलक्षण्यात्वादिति । तदर्थः ।
सामान्यमुखी व्याप्तिः शाब्द । [illegible] यत्पदज्ञाननिरूपितज्ञानावच्छिन्नकरणताश्रयस्य यज्ज्ञाने जननी
ये सहकारित्वे सव्यभिचारिवैलक्षण्यात् पदं भवति तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयतासंबंधेनाव
च्छेदकं भावति यथा व्याप्तिशाब्दशक्तिश्चेति । नरूपोवयवे त्रिपसंनिकर्षे व्यभिचार[redacted]वारणाय ज्ञापमान
करणमिति । शाब्दबोधं प्रति ज्ञापमानकरणशब्दस्य स्वस्य स्वजननीये उपयोगिनी शाब्दनिष्ठे [illegible] समम
वाये व्यभिचार इति ज्ञानोपयोगीति । तमात्र पलहाने प्रति तत्र ज्ञापमानं करणं तज्ज्ञाने जननीये सहकारी
त्वयोन्नदोषः । नच सल्लिंगपरामर्शे व्यभिचारः । ज्ञापमानत्वस्य ज्ञानविशिष्टत्वरूपो । तत्सल्लिंगपरामर्शस्य ज्ञा शि
न विशिष्टज्ञापमानकारणसहकारित्वात् पक्षे नसति परभावात्कार्याभावः । तस्यैव तत्सहकारित्वात् ।
नस्वविशिष्टस्वासहकारित्वात् तथा च तज्ज्ञाननिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य ज्ञापक
त्वघटितधर्मावच्छिन्नकरणताक ज्ञाने तज्जननीये सहकारित्वमर्थः । परामर्शस्य ज्ञानलिंगत्वेनैवानुमि पपवस्य
तिकारणतया परामर्शविशिष्टसत्त्वेन परामर्शासमवायान्न व्यभिचारः । [illegible] मानं कृत्वादित्याद्युपमा
नमानलिंगसत्त्वेपि व्याप्ति[illegible]भावेन प्रमानुमित्यभावात् व्याप्तिवदिति दृष्टांतसंगतिः व्याप्तिवत् धर्मि
तावल्लिंगवत्त्वेन प्रमानुमितिकारणत्वात् । ज्ञापमानशब्दसत्त्वे शाब्दसमवायाभावे नैव तादृशसहकारि[illegible] स्य

स॰ रा॰ ५

शब्दसमवायेऽभावेपि । व्याघ्रभरतो धूमत्वसामान्यलक्षणाजन्यपरामर्शविशिष्टधूमसत्वेपि धूम
निष्ठरूपाभावेन धूमवान्भूधरानुदयात् परामर्शस्य मानाद्धूमस्य सत्यत्वे तत्तन्नीयेसहकारिभेदे धूम
निष्ठरूपादेर्व्यभिचारवारणाय ज्ञानोपधेयीत्यत्र ज्ञापमानत्वघटितधर्मावच्छिन्नकारणतावच्छेदकज्ञा
ज्ञानपदस्य ज्ञापमानपदस्य निवेशः । अत एव त्वयि त्वां परामर्शस्य मानात्लिंगसत्वेपि सल्लिंगपरा
र्शाभावसंभवात् कथं सल्लिंगकपरामर्शे व्यभिचारनिरासः । नचयत्र स्थाने प्रत्युपयोगितातत्ज्ञानकरणता
वच्छेदकं ज्ञानविशिष्टकरणासहकारित्वं विवक्षितं । सत्वस्याप्युपमाणालिंगत्वेन प्रमानुमितिहेतुत्वे
सल्लिंगत्वे सत्परामर्शाभावइतिवाच्यं तथा सति व्याप्तिवृत्तिरिदं प्रतीतासंगतेः । व्याप्तिपक्षधर्मतावल्लिंगे
विना प्रमानुमितिं प्रत्येवोपयोगितया सत्परामर्शविशिष्टलिंगस्यैव व्याप्यभावासंभवेनतादृश
सहकारित्वस्याव्याप्तेरेव भावादिति । भ्रमप्रमानैयोगबाधाभावादिवारणाय व्यभिचारिवैलक्षण्य
त्वादिति तद्व्यमितिप्रजनकव्यापकत्वं प्रमितिप्रजनकं ज्ञानजन्यसामग्र्यप्रविष्टत्वं । मितिपावत्तानवस्थी
यीरोपामाभावेन प्रमितिप्रजनकज्ञानजनिकासामग्र्यवाप्रसिद्धा । प्रमितिपदेन भासाभिन्नत्वे वि
वक्षितो वतन्मते भ्रमासामग्रीप्रसिद्धप्राप्तिसिद्धिरिति वाच्यं । स्वव्याघिकरणाप्रकारत्वानवच्छिन्नविशेष्यता
शाल्यनुभवत्वस्य प्रमितिपदेन विवक्षणात् तादृशीवस्थितिसामग्र्यां प्रसिद्धा भ्रमजनकानुभवस्यापि प्रमि
तिकरणतया परामर्शाभावे नैव वारणेऽज्ञानविसहकारित्वात् ज्ञानविशिष्टस्यापेक्षणीयत्वमितिवेन्न ।

करणतातिरिक्तज्ञानजनकताश्रयकारणकत्वापत्तेरेव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्। अन्यथा स्वात्मककूटलिंगकानु-
मितिस्थलाभिषिक्तसाध्यस्मृतिमात्राय स्मृतिसामग्र्यप्रविष्टत्वस्य व्याप्यत्वप्रसक्त्वेन दृष्टान्तासिद्ध्याद्यापत्तेः॥ अथैवं ज्ञाभावत्वान्नुमि-
त्यावारकत्वेपि करणतातिरिक्तत्वस्य न वैयर्थ्यं॥ अत्र मात्रेस्यैव स्वात्मककूटलिंगकानुमितिस्थलाभिषिक्तसाध्यस्मृतिजन-
कतया प्रसिद्ध्यावारकत्वाच्च॥ जनकताकारणतोभयसाधारणजनकतात्वस्यैकस्याभावात्। विशेष्ये च निवेशे करणतान्यक-
जनकतात्वस्यैव नेप्रवेशः॥ ननु करणतातिरिक्तजनकतात्वेन प्रवेश इति व्यर्थत्वशंकापि। अनवकाशाच्च उद्बोधकस्याहेनाच स्मृति-
जनकतानिवेशनियमाभावात्। उद्बोधकजन्यजनकताप्रसिद्धिः॥ प्रागभावस्य तु अनन्यथासिद्धत्वेनाहेतुत्वाच्च न प्रमानुमितिप्राग-
भावे व्यभिचार इति दिक्॥ केचित्तु दृष्टप्रवृत्तिविषयवैशिष्ट्यावगाहि ज्ञानमेव प्रकृते प्रकृतेप्रमितिशब्दार्थ इत्याहुः॥ अथ यदा ज्ञा-
यमानकरणत्वस्याधेयत्वस्य सम्भवः॥ तथाच पक्षज्ञानीयज्ञायमानकरणानिष्ठत्वेसतियज्ज्ञानोपयोगित्वसत्ति व्यभिचारि-
वैलक्षण्यं भवति। तत्र ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयतासंबंधेनावच्छेदकं भवतीति व्याप्यत्वं॥ सल्लिंगपरामर्शस्य
न ज्ञायमानकरणत्वमादिति हेतुः॥ अथ यस्यात्मलिंगकानुमितेप्रतिज्ञायमानकरणे आत्मनि तत्स्वरूपे तत्त्वावारणमिति चेन्न। न ज्ञा-

न॰ प्रा॰ नधिकरणत्वस्य ज्ञायमानकरणेनैव ग्रहात्॥ अत एव प्रागभावस्य तत्र वह्नित्वेन हेतुत्वेपि न प्रमानुमितिप्रागभावे व्यभिचारः॥
12 धूमनिष्ठानेकाधिकरणत्वादिकारणायत्तानेकोपकोटित्वसत्तीति॥ बाधाभावादिकारणाव्यभिचारित्वे लक्षणपत्वादिति॥ तदर्थस्त्वा
भासस्य शृंगत्वं भ्रमजनकं भिन्नत्वमिति यावत्॥ वस्तुमात्रस्यैव लिंगविधया भ्रमजनकतया ज्ञायमानलिंगत्वादिति रिक्तरूपेण
भ्रमजनकभिन्नत्वं विवक्षणीयं न च तन्मतेन तद् प्रसिद्धिः॥ विसंवादिप्रवृत्तिजनकज्ञानमात्रस्यैव तन्मतेन प्राभाकरात्॥ न चा
बाधितत्वादि तथा बोधस्य विपरीतनिश्चयस्य सद्भावे ज्ञानमात्राभावेन तदभावस्य ज्ञानमात्रप्रयोजकत्वादिति॥ ननु तन्मतेऽग्रही
तासंसर्गकग्रहणस्मरणात्मकज्ञानद्वयस्यैव भ्रमतया विसंवादिप्रवृत्तिजनकत्वेन तस्य चानिर्धेर्मितावच्छेदकतया बाधाभावस्य न तत्र हे
तुत्वमिति कथमेतत्॥ अत्र केचित्॥ विसंवादिप्रवृत्तिजनकत्वेन न ज्ञानस्य प्रवेशः॥ अपितु स्मृतित्वेन तथा च स्मृतिजनकता
वच्छेदकावच्छिन्नान्यत्वादिनि तदर्थः॥ जनकतावोद्बोधकव्यावृत्तत्वेन नासिद्धिरिति॥ असंसर्गाग्रहविशिष्टज्ञानद्वये च
प्रसक्तिरेकाप्यंवा धस्य विरोधित्वमिष्यत एवेत्यधिकमग्रे इति दिक्॥ तच्च ताद्रूप्यं सामान्यतः तत्र तत्पदार्थत्वेन रूपेण तत्तत्पदा
र्थोपस्थितौ विधिष्यते तत्तत्पदार्थोपस्थितिं न च तत्र च वेदस्थले घटपदार्थविशिष्टाः सपदार्थविशेष्यकघटपदार्थप्रकारकप्रती एप्र॰
तिद्वयसाध्यानत्वरूपतात्पर्यज्ञानमेव हेतुः॥ तत्र सामान्यतः घटपदार्थत्वादिना नानासर्वग्रहेपि पदादेरपि लक्षणादि

नाघटपदार्थत्वसंभवेन घटविशिष्टकर्मताविशेष्यकप्रतीतीच्छयोच्चरितं न वेति विशिष्यसंदेहे शाब्दबोधापत्तेः॥ वस्तुतस्तु
कृष्णादिनाः स्वार्थोसंभवेनैकपदार्थत्वेन ज्ञानेपि विशिष्यसंदेहाभावात्॥ तथा कपिंजल्यानालभेतेत्यादौ प्रथमोपस्थि
तत्वरूपलाघवतर्कं निर्णीतत्रित्वविशिष्टकपिंजलपदार्थपरं बहुवचनं तेन कपिंजलपदमिति सामान्यतः कपिंजल
पदार्थत्वरूपेणातात्पर्यनिर्णयेपि विशिष्यकपिंजलत्वादिरूपेणतात्पर्यसंशयसंभवात्॥ लोके तु यत्र रूपेण पदार्थे तात्पर्य
संभवेन लाघवतर्कनिवर्तनात् विशिष्यसंदेह संभवेन घटविशिष्टकर्मत्वविशेष्यकघटप्रकारकप्रतीतीच्छयोच्चरित
मिदमिति तात्पर्यनिर्णयस्य शाब्दबोधात्पूर्वमवश्यापेक्षितत्वात् लौकिकमनुवादकं न स्यात् लौकिकवाक्यसर्वमेवानुवा
दकत्वात् प्रमाणं तं वेदे तु तदभावात्प्रामाण्यमित्यूचुः॥ तदसत्॥ एकपदार्थविशिष्टापरपदार्थविशेष्यक एकपदार्थप्रका
रकप्रतीतीच्छयोच्चरितत्वरूपयथार्थतात्पर्यनिश्चयत्वेन हेतुत्वे याथार्थ्यानिवेशगौरवात्। किंतु नानार्थानुरोधेन शाब्द
सामान्ये एकपदार्थप्रकारकापरपदार्थविशेष्यकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानस्यैव॥ नचैवं करकादि
प्रायप्रयुक्तपयसादिसंचतीत्सपोष्यवाक्ये प्रमापत्तिरितिकृत्स्नमिति वाच्यं॥ एकपदार्थे अपरपदार्थवत्त्वरूपयोग्यता

न॰शा॰ प्रमाणाएवंसंशयनिश्चयसाधारणत्वेनाकारणत्वात्॥ अपि चेदं वाक्यं प्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानज
न्यवाक्यत्वात् तत्सम्प्रमादेर्बोधेऽप्यवक्तास्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् प्रमादजन्यवाक्यार्थज्ञानजन्यवा
13 क्यप्रयोक्तृत्वादहमिवेत्यपि यथार्थवाक्यार्थज्ञानानुमानस्यैकैकएव यथार्थवाक्यार्थप्रतीतिपरयोललिङ्गे हेतुर्वाच्यः॥
तच्चनसंभवति॥ अतोनेः पुरुषधर्मत्वेनप्रमादजन्यत्वनियोपासंभवान्नसंवादिप्रवृत्तिजनकत्वादेश्चतद्ग्राहकलिंग
स्य शाब्दबोधोत्तरकालीनत्वादित्यास्तांविस्तरः॥ ननु शब्दस्यानुमानान्तर्गतत्वेघटमानयेतिशब्दात घटादिपदे
शक्तिमविदुषोपि शाब्दबोधापत्तिः॥ ममतु तत्र व्याप्तिज्ञानाभावादेव तत्रसम्भवत्साशायेनाशङ्कते॥ नन्विति॥ तत्र
प्रत्येण शाब्दत्वेन घामाघटादिपदेशक्तिग्रहेणगृहीतशक्तिकाना॥ एतदुक्ताश्रियाद्दिति॥ इतरकारणं च कारणमवहितकारणत्वेव फलो
पधायकत्वेनकेवलशाब्दसन्निपि शक्तिज्ञानरूपसहकारिविरहात् न तत्र फलोपधानमिति भावः॥ उपोद्घातसङ्गत्याशाङ्क्यति
रूपयितुंशंकते॥ अथेति॥ इयं शब्दसहकारिग्रहविषयक॥ पदार्थोतरमिति॥ तत्सहार्थेनावच्छेदकाभावकूटवीतरेखयर्थः॥ ते राम॰
ननसिद्धासिद्धिव्याघातः॥ संकेतस्यास्यां॥ वक्ष्यमाणसंकेतजन्यग्रहविषयइत्यर्थः॥ आवश्यकत्वात्॥ अभिधाज्ञानेऽभवता मध्य
पेक्षणीयत्वात्॥ साकेनोनरू ॥ ॥